# .. shrIdevakRita lakShmI stotram ..

# ॥ શ્રીલક્ષ્મીસ્તોત્રં દેવકૃત ॥

## Document Information

Text title : devakRita lakShmI stotram
File name : devalaxmi.itx
Location : doc_devii
Author : deva
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : http://www.webdunia.com
Proofread by : Sridhar Seshagiri <seshagir at engineering.sdsu.edu>
Latest update : December 29, 2001
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીલક્ષ્મીસ્તોત્રં દેવકૃત ॥

ક્ષમસ્વ ભગવંત્યવ ક્ષમાશીલે પરાત્પરે ।
શુદ્ધસત્ત્વસ્વરૂપે ચ કોપાદિપરિવર્જિતે ॥

ઉપમે સર્વસાધ્વીનાં દેવીનાં દેવપૂજિતે ।
ત્વયા વિના જગત્સર્વં મૃતતુલ્યં ચ નિષ્ફલમ્ ॥

સર્વસમ્પત્સ્વરૂપા ત્વં સર્વેષાં સર્વરૂપિણી ।
રાસેશ્વર્યધિ દેવી ત્વં ત્વત્કલાઃ સર્વયોષિતઃ ॥

કૈલાસે પાર્વતી ત્વં ચ ક્ષીરોદે સિન્ધુકન્યકા ।
સ્વર્ગે ચ સ્વર્ગલક્ષ્મીસ્ત્વં મર્ત્યલક્ષ્મીશ્ચ ભૂતલે ॥

વૈકુંઠે ચ મહાલક્ષ્મીર્દેવદેવી સરસ્વતી ।
ગંગા ચ તુલસી ત્વં ચ સાવિત્રી બ્રહ્માલોકતઃ ॥

કૃષ્ણપ્રાણાધિદેવી ત્વં ગોલોકે રાધિકા સ્વયમ્ ।
રાસે રાસેશ્વરી ત્વં ચ વૃંદાવન વને-વને ॥

કૃષ્ણા પ્રિયા ત્વં ભાંડીરે ચંદ્રા ચંદનકાનને ।
વિરજા ચંપકવને શતશૃંગે ચ સુંદરી ॥

પદ્માવતી પદ્મવને માલતી માલતીવને ।
કુંદદંતી કુંદવને સુશીલા કેતકીવને ॥

કદંબમાલા ત્વં દેવી કદંબકાનનેઽપિ ચ ।
રાજલક્ષ્મી રાજગેહે ગૃહલક્ષ્મીગૃહે ગૃહે ॥

ઇત્યુક્ત્વા દેવતાઃ સર્વા મુનયો મનવસ્તથા ।
રૂરૂદુર્નમ્રવદનાઃ શુષ્કકંઠોષ્ઠ તાલુકાઃ ॥

ઇતિ લક્ષ્મીસ્તવં પુણ્યં સર્વદેવૈઃ કૃતં શુભમ્ ।
યઃ પઠેત્પ્રાતરૂત્થાય સ વૈ સર્વૈ લભેદ્ ધ્રુવમ્ ॥

અભાર્યો લભતે ભાર્યાં વિનીતાં સુસુતાં સતીમ્ ।
સુશીલાં સુંદરીં રમ્યામતિસુપ્રિયવાદિનીમ્ ॥

પુત્રપૌત્રવતીં શુદ્ધાં કુલજાં કોમલાં વરામ્ ।
અપુત્રો લભતે પુત્રં વૈષ્ણવં ચિરજીવિનમ્ ।
પરમૈશ્વર્યયુક્તં ચ વિદ્યાવંતં યશસ્વિનમ્ ।
ભ્રષ્ટરાજ્યો લભેદ્રાજ્યં ભ્રષ્ટશ્રીર્લભતે શ્રિયમ્ ॥

હતબંધુર્લભેદ્બંધું ધનભ્રષ્ટો ધનં લભેત્ ।

કીર્તિહીનો લભેત્કીર્તિં પ્રતિષ્ઠાં ચ લભેદ્ ધ્રુવમ્ ॥
સર્વમંગલદં સ્તોત્રં શોકસંતાપનાશનમ્ ।
હર્ષાનંદકરં શશ્વદ્ધર્મ મોક્ષસુહૃત્પ્રદમ્ ॥
॥ ઇતિ શ્રીદેવકૃત લક્ષ્મીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

.. shrIdevakRita lakShmI stotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*